तस्मिन् देशे शौचं कर्त्तव्यं यस्मादरत्निमात्रव्यवहितं जलं तत् स्थलमेव तीर्थं जलसमीपत्वात् ।”
इत्याह्निकाचारतत्त्वम् ॥ * ॥
विप्रचरणयोस्तीर्थवासस्थानत्वं ब्राह्मणशब्दे द्रष्टव्यम् ॥ * ॥ · विप्रदक्षिणकर्णस्य तीर्थवासस्थानत्वं यथा । पराशरः ।
“प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा ।
विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत् ॥”
इत्याह्निकाचारतत्त्वम् ॥
हस्तस्थिततीर्थानि यथा,-
“अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्मूले कायम् ।
मध्येऽङ्गुष्ठाङ्गुल्योः पैत्रं मूले त्वङ्गुष्ठस्य ब्राह्मम् ॥”
इत्यमरः । २ । ७ । ५१ ॥
(यथा च, मार्कण्डेये । ३४ । १०३—१०८ ।
“कुर्य्यात् कर्म्माणि तीर्थेन स्वेन स्वेन यथाविधि ।
दैवादीनां तथा कुर्य्याद् ब्राह्मेणाचमनक्रियाम् ॥
अङ्गुष्ठोत्तरतो रेखा पाणेर्या दक्षिणस्य तु ।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै ॥
तर्ज्जन्यङ्गुष्ठयोरन्तः पैत्रं तीर्थमुदाहृतम् ।
पितॄणां तेन तोयादि दद्यान्नान्दीमुखादृते ॥
अङ्गुल्यग्रे तथा दैवं तेन दिव्यक्रियाविधिः ।
तीर्थं कनिष्ठिका मूले कायं तेन प्रजापतेः ॥
एवमेभिः सदा तीर्थैर्देवानां पितृभिः सह ।
सदा कार्य्याणि कुर्व्वीत नान्यतीर्थेन कर्हिचित् ॥
ब्राह्मेणाचमनं शस्तं पित्र्यं पैत्रेण सर्व्वदा ।
देवतीर्थेन देवानां प्राजापत्यं निजेन च ॥
नान्दीमुखानां कुर्व्वीत प्राज्ञः पिण्डोदकक्रियाम् ।
प्राजापत्येन तीर्थेन यच्च किञ्चित् प्रजापतेः ॥”)
तीर्थं त्रिविधम् । यथा । जङ्गमम् १ मानसम् २ स्थावरम् ३ । तथा च ।
“ब्राह्मणा जङ्गमं तीर्थं निर्म्मलं सार्व्वकामिकम् ।
येषां वाक्योदकेनैव शुद्ध्यन्ति मलिनो जनाः ॥
अगस्तिरुवाच ।
शृणु तीर्थानि गदतो मानसानि ममानघे ! ।
येषु सम्यक् नरः स्नात्वा प्रयाति परमां गतिम् ॥
सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः ।
सर्व्वभूतदया तीर्थं सर्व्वत्रार्ज्जवमेव च ॥
दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते ।
ब्रह्मचर्य्यं परं तीर्थं तीर्थञ्च प्रियवादिता ॥
ज्ञानं तीर्थं धृतिस्तीर्थं पुण्यं तीर्थमुदाहृतम् ।
तीर्थानामपि तत्तीर्थं विशुद्धिर्म्मनसः परा ।
एतत्ते कथितं देवि ! मानसं तीर्थलक्षणम् ॥
भौमानामपि तीर्थानां पुण्यत्वे कारणं शृणु ।
यथा शरीरस्योद्देशाः केचिन्मेध्यतमाः स्मृताः ।
तथा पृथिव्यामुद्देशाः केचित् पुण्यतमाः स्मृताः ॥
प्रभावादद्भुताद्भूमेः सलिलस्य च तेजसा ।
परिग्रहान्मुनीनाञ्च तीर्थानां पुण्यता स्मृता ॥
तस्माद्भौमेषु तीर्थेषु मानसेषु च नित्यशः ।
उभयेष्वपि यः स्नाति स याति परमां गतिम् ॥”
तीर्थागमने दोषो यथा,--
“अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ।
अदत्वा काञ्चनं गाञ्च दरिद्रो नाम जायते ॥”

तीर्थगमने फलं यथा,—
“अग्निष्टोमादिभिर्यज्ञैरिष्टा विपुलदक्षिणैः ।
न तत्फलमवाप्नोति तीर्थाभिगमनेन यत् ॥ * ॥
तीर्थान्यनुसरन् धीरः श्रद्दधानः समाहितः ।
कृतपापो विशुध्येत किं पुनः शुद्धकर्म्मकृत् ॥
तिर्य्यग्योनिं न वै गच्छेत् कुदेशे न च जायते ।
न दुःखी स्यात् स्वर्गभाक् च मोक्षोपायञ्च विन्दति ॥
तीर्थफलभागिनो यथा,—
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ।
विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥
प्रतिग्रहादुपावृत्तः सन्तुष्टो येन केनचित् ।
अहङ्कारविमुक्तश्च स तीर्थफलमश्नुते ॥
अदाम्भिको निरारम्भो लघ्वाहारो जितेन्द्रियः ।
विमुक्तः सर्व्वसङ्गैर्यः स तीर्थफलमश्नुते ॥
अकोपनोऽमलमतिः सत्यवादी दृढ़व्रतः ।
आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥
अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः ।
हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः ॥”
इति काशीखण्डम् ॥ * ॥
तीर्थयात्राविधानं यथा,—
“यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे ।
कृतोपवासः शुचिरप्रमत्तः
संपूजयेद्भक्तिनम्रो गणेशम् ॥
देवान् पितॄन् ब्राह्मणांश्चैव साधून्
धीमान् प्रीणयन् वित्तशक्त्या प्रयत्नात् ।
प्रत्यागतश्चापि पुनस्तथैव
देवान् पितॄन् ब्राह्मणान् पूजयेच्च ॥
एवं कुर्व्वतस्तस्य तीर्थे यदुक्तं
फलं तत् स्यान्नात्र सन्देह एव ॥”
इति ब्रह्मपुराणम् ॥ * ॥
“प्रयागे तीर्थयात्रायां पितृमातृवियोगतः ।
कचानां वपनं कुर्य्यात् वृथा न विकचो भवेत् ॥”
इति भविष्यपुराणम् ॥ * ॥
“तीर्थयात्रासमारम्भे तीर्थात् प्रत्यागमेऽपि च ।
वृद्धिश्राद्धं प्रकुर्व्वीत बहुसर्पिःसमन्वितम् ॥”
इति कूर्म्मपुराणम् ॥ * ॥
“ऐश्वर्य्यलाभमाहात्म्यात् गच्छेद्यानेन यो नरः ।
निष्फलं तस्य तत्तीर्थं तस्माद्यानं विवर्ज्जयेत् ॥”
इति मत्स्यपुराणम् ॥ * ॥
“संवत्सरं द्विमासोनं पुनस्तीर्थं व्रजेद्यदि ।
मुण्डनञ्चोपवासञ्च सदा यत्नेन कारयेत् ॥”
इति गङ्गावाक्यावली ॥ * ॥
तीर्थप्राप्त्यनन्तरविधानं यथा,—
“न परीक्ष्यो द्विजस्तीर्थेष्वन्नार्थी भोज्य एव हि ।
सक्तुभिः पिण्डदानञ्च चरुणा पायसेन च ॥
कर्त्तव्यमृषिभिर्दृष्टं पिण्याकेन गुड़ेन च ।
श्राद्धं तत्र तु कर्त्तव्यमर्घ्यावाहनवर्ज्जितम् ॥
अकालेऽप्यथवा काले तीर्थश्राद्धन्तु तर्पणम् ।
अविलम्बेन कर्त्तव्यं नैव विघ्नं समाचरेत् ॥
यदह्नि तीर्थप्राप्तिः स्यात्ततोऽह्नः पूर्व्ववासरे ।
उपवासश्च कर्त्तव्यः प्राप्तेऽह्नि श्राद्धदो भवेत् ॥

तीर्थोपवासः कर्त्तव्यः शिरसो मुण्डनं तथा ।
शिरोगतानि पापानि यान्ति मुण्डनतो यतः ॥
तीर्थं प्राप्य प्रसङ्गेन स्नानं तीर्थे समाचरेत् ।
स्नानजं फलमाप्नोति तीर्थयात्राश्रितं न तु ॥”
इति काशीखण्डम् ॥
“मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः ।
वर्ज्जयित्वा गयां गङ्गां विशालां विरजान्तथा ॥”
इति स्कान्दम् ॥ * ॥
“षोड़शांशं स लभते यः परार्थेन गच्छति ।
अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति ॥”
इति पैठीनसिः ॥
“स्नापयेत् स्निग्धमित्रादीन् ज्ञातींस्तीर्थे नरोत्तमः ।
अन्यथापहरन्त्येते बलात्तीर्थभवं फलम् ॥”
इति स्कान्दम् ॥
“मातरं पितरं जायां भ्रातरं सुहृदं गुरुम् ।
यमुद्दिश्य निमज्जेत अष्टभागं लभेत सः ॥”
इति प्रायश्चित्ततत्त्वे मार्कण्डेयपुराणम् ॥ * ॥
कलौ तीर्थानां पृथिव्यां स्थितिकालो यथा,
“सरस्वती पुण्यक्षेत्रमाजगाम च भारतम् ।
गङ्गा शापेन कलया स्वयं तस्थौ हरेः पदे ॥
पश्चाद्भगीरथानीता मर्त्त्यं भागीरथी शुभा ।
समाजगाम कलया वाणी शापेन नारद ! ॥
पद्मा जगाम कलया सा च पद्मावती नदी ।
भारतं भारती शापात् स्वयं तस्थौ हरेः पदे
कलेः पञ्चसहस्रञ्च वर्षं स्थित्वा च भारते ।
जग्मुस्ताश्च सरिद्रूपं विहाय श्रीहरेः पदम् ॥
यानि सर्व्वाणि तीर्थानि काशीं वृन्दावन ना ।
यास्यन्ति ताभिः सार्द्धञ्च वैकुण्ठमाज्ञया हरेः ॥”
तीर्थप्रतिग्रहे दोषो यथा,—
“तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे ।
वाराणस्यां वदर्य्याञ्च गङ्गासागरसङ्गमे ॥
पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले ।
हरिद्वारे च केदारे सोमे वदरपाचने ॥
सरस्वतीनदीतीरे पुण्ये वृन्दावने वने ।
गोदावर्य्याञ्च कौशिक्यां त्रिवेण्याञ्च हिमालये ॥
एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः ।
स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥ * ॥
यानादिना गमने दोषो यथा,—
“पुण्यार्द्धं हरते याने तदर्द्धं छत्रपादुके ।
तदर्द्धं तैलमांसाभ्यां सर्व्वं हरति मैथुने ॥”
इति कर्म्मलोचनम् ॥ * ॥
युगभेदे तीर्थविशेषस्य श्रेष्ठत्वं पाद्मे ।
“कृते तु पुष्करं तीर्थं त्रेतायां नैमिषन्तथा ।
द्वापरे तु कुरुक्षेत्रं कलौ गङ्गां समाश्रयेत् ॥”
तीर्थसंख्या यथा,—
“तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत् ।
दिवि भुव्यन्तरीक्षे च तानि ते सन्ति जाह्नवि ! ॥”
अथ भूमण्डलस्य प्रादक्षिण्येन तीर्थानि यथा ।
पुष्करम् १ तत्तु ब्रह्मणः स्थानं तीर्थराजेति नाम्ना ख्यातं तत्र त्रिसन्ध्यं दशकोटितीर्थान्यायान्ति ।
तस्य फलं अश्वमेधतुल्यं ब्रह्मलोकगमनञ्च ॥ जम्बू-